भेकः, पुं, (बिभेति इति । भी + "इण्भीकापाशल्यतीति ।" उणा० । ३ । ४३ । इति कन् । जन्तुविशेषः । व्याङ् इति भाषा । तत्पर्य्यायः । मण्डूकः २ वर्षाभूः ३ शालूरः ४ प्लवः ५ दर्दुरः ६ । इत्यमरः ।१।१०।२४॥ हरिभूः ७ सालूरः ८ । इति तट्टीका ॥ प्लवङ्गमः ९ व्यङ्गः १० प्लवगः ११ प्लक्षः १२ नन्दनः १३ गूढवर्च्चाः १४ अजिह्वः १५ जिह्मामोहनः १६ । इति शब्दरत्नावली ॥ नन्दकः १७ शतालयः १८ रेकः १९ । इति त्रिकाण्डशेषः ॥ मण्डः २० हरिः २१ लुलुकः २२ । क्वचित् पुस्तके लूलकोऽपि पाठः । शालूकः २३ कटुरवः २४ । अस्य मांसगुणाः । सद्योबलकरत्वम् । श्लेष्मदाहप्रमेहक्षयकुष्ठच्छर्द्दिनाशित्वञ्च । इति राजनिर्घण्टः ॥ मेघः । इति मेदिनी । के, ३० ॥ (यथा, आर्य्यासप्तशत्याम् । ४५१ ।

"संहृततेऽस्मीगुदधिर्विदाघनद्यो न भेकमपि ।")

भेकटः, पुं, (भेक इव टलति । भेक + टल + डः ।) मत्स्यभेदः । यथा । तुल्यौ भेकटवेकटौ । इति द्विरूपकोषः ॥

भेकनिः, पुं, मत्स्यविशेषः । भाङ्गन इति भाषा । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । हृद्यत्वम् । श्लेष्मकरत्वम् । गुरुत्वञ्च । इति राजवल्लभः । भेकलिः । इति च पाठः ॥

भेकपर्णी, स्त्री, (भेकाकृति पर्णमस्याः ङीष् ।) मण्डूकपर्णी । इति केचित् ॥ (यथा,—

"ततृषन्त्री कन्यकाद्रावैर्मर्द्दयेद्भावयेत्तथा ।
भेकपर्णीरसेनैव गुञ्जाद्वयवटीं हिताम् ।"

इति वैद्यकरसेन्द्रसारसंग्रहे हृद्रोगमगधरसे ॥)

भेकभुक् [ज्] पुं, (भेकं भुङ्क्ते इति । भुज् + क्विप् । सर्पः । इति त्रिकाण्डशेषः ॥

भेकी, स्त्री, (भेक + "जातेरस्त्रीविषयादयोपधात् ।" ४ । १ । ६३ । इति ङीष् ।) भेकप्रिया । तत्पर्य्यायः । शिली २ गण्डुपदी ३ वर्षाभ्वी ४ इत्यमरः । १ । १० । २४ ॥ अन्येऽपीवन्तभेकपर्य्याया एतद्वाचकाः । मण्डुकपर्णीौषधः । इति रत्नमाला ॥ (यथास्याः पर्य्यायान्तरम् ।

"भेकी मण्डूकपर्णी च मण्डूकी मलपर्ण्यपि ।"

इति रत्नमालायाम् ।)

भेड़ः, पुं, (भी + बाहुलकात् डः । अस्येत्त्वम् न गुणत्वं च ।) मेषः । इति हेमचन्द्रः ।४।३४२। अस्य भाषा भेड़ा ॥

भेड़ी, स्त्री, (भेड़ + ङीष् ।) भेड़भार्य्या । अवी । अस्या दुग्धगुणाः ।

"आविकं लवणं स्वादु स्निग्धोष्णाश्मरीप्रणुत् ।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम् ।
गुरुकासेऽनिलोद्भूते केवले चानिले वरम् ।"

इति भावप्रकाशः ॥

भेत्ता, [ऋ] त्रि, (भिनत्तीति । भिद + तृच् ।) भेदकर्त्ता । यथा, व्यवहारतत्त्वे ।

"कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपतः ॥"

भेदः, पुं, (भिद् + घञ् ।) शत्रुवशीकरणोपायचतुष्टयान्तर्गततृतीयोपायः । तत्पर्य्यायः । उपजापः २ । इत्यमरः । २ । ८ । २१ ॥ परतो विश्लेष्य आत्मसात् करणं भेदः । इति भरतः ॥ तद्विशेषो यथा,—

मत्स्य उवाच ।

"परस्परन्तु ये दुष्टाः क्रुद्धा भीतावमानिताः ।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः ॥
ये तु येनैव दोषेण परस्मान्नापि बिभ्यति ।
ते तु तद्दोषपातेन भेदनीया भृशं ततः ॥
आत्मीयां दर्शयेदाशां परस्माद्दर्शयेद्भयम् ।
एवं हि दर्शयेद्धिमान् यथावद्वशमानयेत् ॥
संहता हि विना भेदं शक्रेणापि सुदुःसहाः ।
भेदमेव प्रशंसन्ति तस्मान्नयविशारदाः ॥
स्वमुखेनाश्रयेद्भेदं भेदं परमुखेन च ।
परीक्ष्य साधु मन्येत भेदं परमुखाच्छ्रुतम् ॥
भेद्याः स्वकार्य्यमुद्दिश्य कुशलैर्ये हि भेदिताः ।
भेदितास्ते विनिर्द्दिष्टा नैव राजार्थवादिभिः ॥
अन्तःकोपो बहिःकोपो यत्र स्यातां महीक्षिताम् ।
अन्तःकोपो महांस्तत्र नाशकः पृथिवीक्षिताम् ॥
सामन्तकोपो बाह्यस्तु कोपः प्रोक्तो मनीषिभिः ।
महिषीयुवराजाभ्यां तथा सेनापतेर्नृप ! ॥
अमात्यमन्त्रिणाश्चैव राजपुत्रास्तथैव च ।
अन्तःकोपो विनिर्द्दिष्टो दारुणः पृथिवीक्षिताम् ॥
बाह्यकोपे समुत्पन्ने सुमहत्यपि पार्थिवः ।
शुद्धान्तस्तु महाभाग ! शीघ्रमेव जयी भवेत् ॥
अपि शक्रसमो राजा अन्तःकोपेन नश्यति ।
सोऽन्तःकोपःप्रयत्नेन तस्माद्रक्ष्यो महीक्षिता ॥
परतः कोपमुत्पाद्य भेदेन विजिगीषुणा ।
ज्ञातीनां भेदनं कार्य्यं परेषां विजिगीषुणा ॥
रक्ष्यश्चैव प्रयत्नेन ज्ञातिभेदस्तथात्मनः ।
ज्ञातयः परितप्यन्ते सततं परितप्य यम् ॥
तथापि तेषां कर्त्तव्यं सुगम्भीरेण चेतसा ।
ग्रहणं दानमानाभ्यां भेदस्तेभ्यो भयङ्करः ॥
न ज्ञातिरनुगृह्णाति न ज्ञातिर्न्धुमिच्छति ।
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः ॥
भिन्ना हि शक्या रिपवः प्रभूताः
स्वल्पेन सैन्येन निहन्तुमाजौ ।
सुसंहतानां हि ततस्तु भेदः
कार्य्यो रिपूणां नयशास्त्रविद्भिः ॥"

इति मात्स्ये राजधर्म्मे २२२ अध्यायः ॥*॥ द्वैधः । विश्लेषः । विदारणम् । इति मेदिनी । दे, १२ ॥ (तथा च कामन्दकीये । १५ । १६ ।

"पुरश्च पश्चाच्च यदा समर्थस्तदाभियायाज्जहते पलाय ।
पुनः प्रसर्पेन्नविशुद्धपृष्ठः
प्राप्नोति तीव्रं खलु पार्ष्णिभेदम् ॥")

विरेकः । यथा, हास्यार्णवनाटके ।

"कापि धूमस्तुमाणां बलवति मरुते खेदभेदोपकाशा
वह्नेमान्द्ये च पिष्टं सपिशितमनिशं वारिपानं कफार्त्तौ ॥"

भेदकः, त्रि, (भिद् + ण्वुल् ।) विदारकः । यथा, मनौ । ९ । २८५ ।)

("संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः ।
प्रतिकुर्य्याच्च तत् सर्व्वं पञ्च दद्याच्छतानि च ॥"

विरेचकौषधादिः । (विरेचकौषधार्थे विषयो यथा,

"नवज्वरे च ये योगा भेदकाः परिकीर्त्तिताः ।
ते तथैव प्रयोक्तव्या वीक्ष्य देहमलादिकम् ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे विरेकाधिकारे ।)
पृथक्कारकः । यथा । "भेदयति अन्यपदार्थं पृथक् करोतीति भेदकं नाम्ना शिवः गोत्रेण गार्ग्यः ।" इति कारकटीकायां दुर्गादासः ॥ अपि च ।

"भेद्यभेदकयोः श्लिष्टं सम्बन्धोऽन्योन्यमिष्यते ।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ।"

इति कलापटीकाधृतभर्तृहरिकारिका ॥

("सामान्यस्य भेदको विशेषः प्रकारः ।"इति च ५ । ३ । ६९ । इत्यस्य । काशिकावृत्तिः ॥)

भेदनं, क्ली, (भिद्यतेऽनेनेति भिद् + ल्युट् ।) हिङ्गु । इति राजनिर्घण्टः ॥ विदारणम् । इति भिद्धातोर्भावेऽनट् प्रत्ययेन निष्पन्नम् ॥ (भेदकारके, त्रि ॥ यथा,भागवते ।३ । २६ । २ ।

"यदाहुर्वर्णये तत् ते हृदयग्रन्थिभेदनम् ।"
"अहङ्कारनिवर्त्तकमिति स्वामिव्याख्यानम् ।"

विरेचनकारके च । यथा च सुश्रुते ।१।१८८।२४॥

सर्व्वं पित्तकरं मद्यमम्लं दीपनरोचनम् ।
भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनम् ॥")

भेदनः, पुं, ("भिद्यतेऽनेनेति ।" भिद + ल्युट् ।) अम्लवेतसः ॥ (भिनत्ति भूमिमिति । ल्युः ॥ शूकरः । इति राजनिर्घण्टः ॥

भेदितः, त्रि, (भिद + णिच् + कर्म्मणि क्तः ।) भिन्नः । दारितः । इत्यमरः । ३ । १ । १०० ॥

भेदी, [न्]पुं,(भेत्तुं शीलमस्येति । भिद + णिनिः ।) अम्लवेतसः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याम्लवेतसशब्दे विज्ञेयाः ॥)

भेदकर्त्तरि तद्विशिष्टे च त्रि ॥ (यथा भागवते । ३ । १५ । ३३ ।

"युत्पादितं ह्युदरभेदि भयं यतोऽस्य ।")

भेदुरं, क्ली, (भिदुर + पृषोदरादित्वात् साधुः ।) भिदुरम् । वज्रम् । इति द्विरूपकोषः ॥

भेरः, पुं, (बिभेत्यस्मादिति । भी + "अर्त्तेन्द्रायसमेति । उणा० । २ । २८ । इति रन् ।) पटहः । भेरी । दुन्दुभिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भेरिः, स्त्री, (बिभ्यति शत्रवोऽस्या इति । भी + "वह्नाद्यश्च ।" उणा० ।४।६६। इति क्रिन् । बाहुलकाद् गुणः ।) ढक्का । तत्पर्य्यायः । आनकः २ दुन्दुभिः ३ । इत्यमरः । १।७।६ ॥ भेरी ४ आनकदुन्दुभिः ५ आनकदुन्दुभी ६ । इति तट्टीकायां भरतः ॥ (यथा, "ततो भेरिवेणुवीणामृदङ्गतालपटहशङ्खकाहलादिभेदेन शब्दा अनेकविधाः ।" इति पञ्चतन्त्रे प्रथमतन्त्रम् ॥)